श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.9- प्रथम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्

श्रीमद्भागवतमहापुराणम्

एकादशः स्कंधः

अथनवमोऽध्यायः

## ब्राह्मण उवाच

परिग्रहो हि दुःखाय, यद् यत्प्रियतमं(न्) नृणाम् ।
अनन्तं(म्) सुखमाप्नोति, तद् विद्वान् यस्त्वकिं(ञ्)चनः ॥ 1॥

यत्+ प्रियतमं(न्),सुख+ माप्+ नोति, यस्+ त्व+ किं(ञ्)चनः

सामिषं(ङ्) कुररं(ञ्) जघ्नुर्- बलिनो ये निरामिषाः ।
तदामिषं(म्) परित्यज्य, स सुखं(म्) समविन्दत ॥ 2॥

न मे मानावमानौ स्तो, न चिन्ता गेहपुत्रिणाम् ।
आत्मक्रीड आत्मरतिर्- विचरामीह बालवत् ॥ 3॥

माना+ वमानौ, विचरा+ मीह

**द्वावेव चिन्तया मुक्तौ, परमानन्द आप्लुतौ ।**
**यो विमुग्धो जडो बालो, यो गुणेभ्यः(फ्) परं(ङ्) गतः ॥ 4॥**

**क्वचित् कुमारी त्वात्मानं(म्), वृणानान् गृहमागतान् ।**
**स्वयं(न्) तानर्हयामास, क्वापि यातेषु बन्धुषु ॥ 5॥**

त्वात् + मानं(म्), तानर् + हयामास

**तेषामभ्यवहारार्थं(म्), शालीन् रहसि पार्थिव ।**
**अवघ्नन्त्याः(फ्) प्रकोष्ठस्थाश्- चक्रुः(श्) शं(ङ्)खाः(स्) स्वनं(म्) महत् ॥ 6॥**

तेषामभ्य+ वहारार्थं(म्), अवघ्+ नन्त्याः(फ्), प्रकोष्ठस् + थाश्

**सा तज्जुगुप्सितं(म्) मत्वा, महती व्रीडिता ततः ।**
**बभं(ञ्)जैकैकशः(श्) शं(ङ्)खान्, द्वौ द्वौ पाण्योरशेषयत् ॥ 7॥**

तज् + जुगुप्+ सितं(म्), बभं(ञ्) + जैकैकशः(श्),

पाण्यो+ रशेषयत्

**उभयोरप्यभूद् घोषो , ह्यवघ्नन्त्याः(स्) स्म शं(ङ्)खयोः ।**
**तत्राप्येकं(न्) निरभिद- देकस्मान्नाभवद् ध्वनिः ॥ 8॥**

उभयो+ रप्य+ भूद्, ह्यवघ्+ नन्त्याः(स्),

देकस्मान्+ नाभवद्

**अन्वशिक्षमिमं(न्) तस्या, उपदेशमरिन्दम ।**
**लोकाननुचरन्नेताँल्- लोकतत्त्वविवित्सया ॥ 9॥**

अन्व+ शिक्ष+ मिमं(न्), उपदे+ शम+ रिन्दम

लोका+ ननुचरन्+ नेताँल्, लोक+ तत्त्व+ विवित्सया

**वासे बहूनां(ङ्) कलहो, भवेद् वार्ता द्वयोरपि ।**
**एक एव चरेत्तस्मात्, कुमार्या इव कं(ङ्)कणः ॥ 10॥**

द्वयो+ रपि, चरेत्+ तस्मात्

**मन एकत्र सं(य्)युज्याज्-जितश्वासो जितासनः ।**
**वैराग्याभ्यासयोगेन, ध्रियमाणमतन्द्रितः ॥ 11॥**

सं(य्)युञ्+ ज्याज्, वैराग्या+ भ्या+ सयोगेन, ध्रियमाण+ मतन्द्रितः

यस्मिन् मनो लब्धपदं(म्) यदेतच्-
छनैः(श्) शनैर्मुं(ञ्)चति कर्मरेणून् ।
सत्त्वेन वृद्धेन रजस्तमश्च,
विधूय निर्वाणमुपैत्यनिन्धनम् ॥ 12॥

शनैर्+ मुं(ञ्)चति ,रजस्+ तमश्च, निर्वा+ णमुपैत्य+ निन्धनम्

तदैवमात्मन्यवरुद्धचित्तो,
न वेद किं(ञ्)चिद् बहिरन्तरं(म्) वा ।
यथेषुकारो नृपतिं(म्) व्रजन्त-
मिषौ गतात्मा न ददर्श पार्श्वे ॥ 13॥

तदै+ वमात्+ मन्य+ वरुद्+ धचित्तो, यथे+ षुकारो

एकचार्यनिकेतः(स्) स्या- दप्रमत्तो गुहाशयः ।
अलक्ष्यमाण आचारैर्- मुनिरेकोऽल्पभाषणः ॥ 14॥

एकचार्+ यनिकेतः(स्),मुनिरे+ कोऽल्प+ भाषणः

गृहारम्भोऽतिदुःखाय, विफलश्चाध्रुवात्मनः ।
सर्पः(फ्) परकृतं(म्) वेश्म, प्रविश्य सुखमेधते ॥ 15॥

गृहा+ रम्भोऽति+ दुःखाय,विफलश्+ चाध्रुवात्मनः

एको नारायणो देवः(फ्), पूर्वसृष्टं(म्) स्वमायया ।
सं(व्)हृत्य कालकलया , कल्पान्त इदमीश्वरः ।।16।।

एक एवाद्वितीयोऽभू- दात्माधारोऽखिलाश्रयः ।
कालेनात्मानुभावेन , साम्यं(न्) नीतासु शक्तिषु ।
सत्त्वादिष्वादिपुरुषः(फ्), प्रधानपुरुषेश्वरः ॥ 17॥

एवा+ द्वितीयोऽभू, दात्मा+ धारोऽ+ खिलाश्रयः, काले+ नात्मा+ नुभावेन

सत्त्वा+ दिष्वा+ दिपुरुषः(फ्), प्रधा+ नपुरुषेश्वरः

परावराणां(म्) परम, आस्ते कैवल्यसं(ञ्)ज्ञितः ।
केवलानुभवानन्द- सन्दोहो निरुपाधिकः ॥ 18॥

कैवल्य+ सं(ञ्)ज्ञितः,केवला+ नुभवा+ नन्द

केवलात्मानुभावेन , स्वमायां(न्) त्रिगुणात्मिकाम् ।
सं(ङ्)क्षोभयन् सृजत्यादौ , तया सूत्रमरिन्दम ॥ 19॥

केवलात्मा+ नुभावेन,सूत्र+ मरिन्दम

तामाहुस्त्रिगुणव्यक्तिं(म्), सृजन्तीं(म्) विश्वतोमुखम् ।
यस्मिन् प्रोतमिदं(म्) विश्वं(म्), येन सं(व्)सरते पुमान् ॥ 20॥

तामा+ हुस्त्रि+ गुण+ व्यक्तिं(म्)

यथोर्णनाभिर्हृदया- दूर्णां(म्) सन्तत्य वक्त्रतः ।
तया विहृत्य भूयस्तां(ङ्), ग्रसत्येवं(म्) महेश्वरः ॥ 21॥

यथोर्+ णनाभिर्+ हृदया,

ग्रसत्+ येवं(म्)

यत्र यत्र मनो देही, धारयेत् सकलं(न्) धिया ।
स्नेहाद् द्वेषाद् भयाद् वापि , याति तत्तत्सरूपताम् ॥ 22॥

तत्+ तत्+ सरूपताम्

कीटः(फ्) पेशस्कृतं(न्) ध्यायन्, कुड्यां(न्) तेन प्रवेशितः ।
याति तत्सात्मतां(म्) राजन्, पूर्वरूपमसन्त्यजन् ॥ 23॥

तत्+ सात्+ मतां(म्),

पूर्वरूप+ मसन् + त्यजन्

एवं(ङ्) गुरुभ्य एतेभ्य, एषा मे शिक्षिता मतिः ।
स्वात्मोपशिक्षितां(म्) बुद्धिं(म्), शृणु मे वदतः(फ्) प्रभो ॥ 24॥

स्वात्मो+ पशिक्षितां(म्)

देहो गुरुर्मम विरक्तिविवेकहेतुर्-
बिभ्रत् स्म सत्त्वनिधनं(म्) सततार्त्युदर्कम् ।
तत्त्वान्यनेन विमृशामि यथा तथापि,
पारक्यमित्यवसितो विचराम्यसं(ङ्)गः ॥ 25॥

विरक्ति+ विवेक+ हेतुर्, सततार्+ त्युदर्+ कम्,

तत्त्वान्+ यनेन, पारक्य+ मित्य+ वसितो,

विचराम्+ यसं(ङ्)गः

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्,
पुष्णाति यत्प्रियचिकीर्षुतया वितन्वन् ।
स्वान्ते सकृच्छ्रमवरुद्धधनः(स्) स देहः(स्),
सृष्ट्वाऽस्य बीजमवसीदति वृक्षधर्मा ॥ 26॥

जायात्+ मजार्थ+ पशुभृत्य+ गृहाप्+ तवर्गान्, यत्+ प्रियचिकीर्+ षुतया
सकृच्+ छ्रमवरुद्+ धधनः(स्), बी+ जमवसी+ दति

जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा,
शिश्नोऽन्यतस्त्वगुदरं(म्) श्रवणं(ङ्) कुतश्चित् ।
घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्-
बह्व्यः(स्) सपत्न्य इव गेहपतिं(म्) लुनन्ति ॥ 27॥

जिह्वै+ कतोऽमु+ मपकर्षति, शिश्नोऽन्+ यतस्+ त्वगुदरं(म्)
घ्राणोऽन्+ यतश्+ चपलदृक्

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या,
वृक्षान् सरीसृपपशून् खगदं(व्)शमत्स्यान् ।
तैस्तैरतुष्टहृदयः(फ्) पुरुषं(म्) विधाय,
ब्रह्मावलोकधिषणं(म्) मुदमाप देवः ॥ 28॥

विविधान्+ यजयाऽऽत्म+ शक्त्या ,सरी+ सृप+ पशून्, खग+ दं(व्)श+ मत्स्यान्
तैस्तै+ रतुष्ट+ हृदयः(फ्), ब्रह्मा+ वलोक+ धिषणं(म्)

लब्ध्वा सुदुर्लभमिदं(म्) बहुसम्भवान्ते,
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं(म्) यतेत न पतेदनुमृत्यु यावन्-
निः(श्)श्रेयसाय विषयः(ख्) खलु सर्वतः(स्) स्यात् ॥ 29॥

सुदुर्+ लभ+ मिदं(म्), बहुसम्+ भवान्ते
मानुष्य+ मर्थ+ दमनित्+ यमपीह, पते+ दनु+ मृत्यु

एवं(म्) सं(ञ्)जातवैराग्यो, विज्ञानालोक आत्मनि ।
विचरामि महीमेतां(म्), मुक्तसं(ङ्)गोऽनहं(ङ्)कृतिः ॥ 30॥

सं(ञ्)जात+ वैराग्यो, मुक्त+ सं(ङ्)गोऽ+ नहं(ङ्)+ कृतिः

**न ह्येकस्माद् गुरोर्ज्ञानं(म्), सुस्थिरं(म्) स्यात् सुपुष्कलम् ।**
**ब्रह्मैतदद्वितीयं(म्) वै , गीयते बहुधर्षिभिः ॥ 31॥**

ह्ये+ कस्माद्, ब्रह्मै+ तदद्+ वितीयं(म्), बहुधर्+ षिभिः

**श्रीभगवानुवाच**

**इत्युक्त्वा स यदुं(म्) विप्रस्- तमामन्त्र्य गभीरधीः ।**
**वन्दितोऽभ्यर्थितो राज्ञा , ययौ प्रीतो यथागतम् ॥ 32॥**

वन्दितोऽभ्यर्+ थितो

**अवधूतवचः(श्) श्रुत्वा , पूर्वेषां(न्) नः(स्) स पूर्वजः ।**
**सर्वसं(ङ्)गविनिर्मुक्तः(स्), समचित्तो बभूव ह ॥ 33॥**

अवधू+ तवचः(श्), सर्वसं(ङ्)ग+ विनिर्मुक्तः(स्)

**इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)**
**सं(व्)हितायामेकादशस्कन्धे नवमोऽध्यायः ॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

